संस्कृत

स्तोत्र

# हनुमत्स्तोत्रम्

५१८ / स्तो. २०८९

Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.
" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

॥ वायुर्भीमोभीमनादोमहौजाः सर्वेषांच प्राणिनां प्राणभूतः नास्यावृत्तिर्देहि-
नां देहपाते तस्माद्वायुर्देवदेवो विशिष्टः ॥१॥ प्रथमो हनुमान्नाम द्वितीयोभी-
मएवच पूर्णप्रज्ञस्तृतीयस्तु भगवत्कार्यसाधकः ॥२॥ ब्रम्हांता गुरवः सा-
क्षाद्दिष्टं देवं श्रियःपतिः आचार्याः श्रीमदाचार्याः संतुमेजन्मजन्मनि ॥३॥
ज्ञाने विरागे हरिभक्तिभावे धृतिस्थितिप्राणबलेषु योगे बुद्धौच नान्यो
हनुमत्समानः पुमानकदाचित्क्वचनकश्चनैव ॥४॥ वीतेन कुंत्यां बलवान्
सुजातः शूरस्तपस्वी द्विषतां निहंता सत्येचधर्मेचरतः सदैव पराक्रमे
शत्रुभिरप्रधृष्यः ॥५॥ यस्य त्रीण्युदितानि वेदवचने रूपाणि दिव्यान्य
लं बट्तद्दर्शनमित्थमेव निहितं देवस्य भर्गो महत् वायो रामवचो
नयं प्रथमकं पृक्षो द्वितीयं वपुर्मध्वो यत्तु तृतीय मेतदमुना ग्रंथः कृतः
केशवे ॥६॥ महाव्याकरणांभोधिमंथमानसमंदरं कवयंतं रामकीर्त्या
हनुमंतमुपास्महे ॥७॥ मुख्यप्राणाय भीमाय नमो यस्य भुजांतरम्

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(२)

नानाधीरसुवर्णानां निकषाश्मामितंबभौ ॥८॥ स्वांतस्थानंतशय्याय
पूर्णज्ञानरसार्णसे उत्तुंगवाक्तरंगाय मध्वदुग्धाब्धयेनमः ॥९॥ येना
हमिहदुर्मार्गाद्दुद्धृत्याभिनिवेशितः सम्यक् श्रीवैष्णवेमार्गे पूर्णप्रज्ञं
नमामितम् ॥१०॥ अनन्याश्चिंतयंतो मां येजनाः पर्युपासते तेषांनित्या
भियुक्तानां योगक्षेमंवहाम्यहम् ॥११॥ यः सर्वगुणसंपूर्णः सर्वदोष
विवर्जितः प्रीयतां प्रीतएवालं विष्णुर्मे परमः सुहृत् ॥१२॥ सुचिरत्ना
करेरम्ये मूलरामायणार्णवे विहरंतो महीयांसः प्रीयंतां गुरवोमम ॥१३॥
हनुमानंजनीसूनुर्वायुपुत्रो महाबलः रामेष्टः फाल्गुनसखः पिंगाक्षो
मितविक्रमः ॥१४॥ उदधिक्रमणश्चैव सीतासंदेशकारकः लक्ष्मण
प्राणदाताच दशग्रीवस्यदर्पहा ॥१५॥ मारुतिः पांडवो भीमो
गदापाणिर्वृकोदरः कौंतेय कृष्णादूतश्च भीमसेनो महाबलः ॥१६॥

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

(६) जरासंधांतकोवीरो दुःशासनविनाशनः पूर्णप्रज्ञो ज्ञानदाता मध्वा
ध्वस्त दुरागमः ॥१७॥ तत्वज्ञो वैष्णवाचार्यो व्यासशिष्यो यतीश्वरः
शुभतीर्थाभिधानश्च जितामित्रो जितेंद्रियः ॥१८॥ श्रीमदानंदना
म्नामेवं द्वादशाकं जपेत् रुभते वैष्णवीं भक्तिं गुरुभक्तिसमन्वितम् ॥१९॥
मनोजवं मारुततुल्यवेगं जितेंद्रियं बुद्धिमतां वरिष्ठम् वातात्मजं
वानरयूथमुख्यं श्रीरामदूतं शिरसा नमामि ॥१॥ बुद्धिर्बलं यशो
धैर्यं निर्भयत्वमरोगता अजाड्यं वाक्पटुत्वंच हनुमत्स्मरणा
द्भवेत ॥२॥ ॥ श्रीमद्धनुमदर्पणमस्तु ॥

(५) ॥ वंदे तं वासुपूर्णप्रमतिमनुदिनासेवितं देववृंदैः वंदे वंदारुमीशे श्रिय
उत नियतं श्रीमदानंदतीर्थम् वंदे मंदाकिनीसत्सरिदमलजलासेक
साधिक्यसंगं वंदेऽहं देवभक्त्या भवभयदहनं सज्जनान्मोदयंतम् ॥४०॥
॥ सुब्रह्मण्याख्यसूरेः सुत इति सुभृशं केशवानंदतीर्थ श्रीमत्पादाब्ज
भक्तः स्तुतिमकृत हरेर्वायुदेवस्य चास्य तत्पादार्चादरेण ग्रथितपदलसन्
मालया त्वेतया ये संराध्यामूत् मतिं प्रतति मतिगुणा मुक्तिमेते व्रजंति ॥४१॥.

" Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

## मूळ प्रत पाहण्यासाठी संपर्क

---

**इतिहासाचार्य वि.का. राजवाडे संशोधन मंडळ, धुळे**
राजवाडे पथ, गल्ली नं. १, धुळे-४२४००१ (महाराष्ट्र)
**दूरध्वनी क्रमांक** (०२५६२) २३३८४८
**Email ID** : rajwademandaldhule@gmail.com